# shrI shrIshaguNadarpaNastotram

# શ્રી શ્રીશગુણદર્પણસ્તોત્રમ્

## Document Information

Text title : shrIshaguNadarpaNastotram

File name : shrIshaguNadarpaNastotram.itx

Category : devii, devI, lakShmI, vAdirAja

Location : doc_devii

Author : vAdirAjayati

Latest update : December 13, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2020

*sanskritdocuments.org*

shrI shrIshaguNadarpaNastotram

# શ્રી શ્રીશગુણદર્પણસ્તોત્રમ્

યા સુગન્ધાસ્યનાસાદિનવદ્વારાઽખિલેન યા ।
દુરાધર્ષા સર્વસસ્યોદયાર્થં યા કરીષિણી ॥ ૧॥

યા નિત્યપુષ્ટા સર્વાઙ્ગૈઃ સૌન્દર્યાદિગુણૈરપિ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥ ૨॥ (શ્રીસૂક્તમ્ ૯)

માતર્લક્ષ્મિ નમસ્તુભ્યં માધવપ્રિયમાનિનિ ।
યુવાં વિશ્વસ્ય પિતરાવિતરેતરયોગિનૌ ॥ ૩॥

“સમના” કિલ માતસ્ત્વમમુના તતયોગિની ।
મમ નાથેન દેવશ્ચ વિમનાશ્ચ ન સ ત્વયિ ॥ ૪॥

ત્વં વેદમાનિની વેદવેદ્યઃ કિલ સ તે પ્રિયઃ ।
ત્વં મૂલપ્રકૃતિર્દેવી સ ચાદિપુરુષઃ કિલ ॥ ૫॥

યસ્ત્વામુરસિ ધત્તેઽમ્બ કૌસ્તુભદ્યુતિભાસિતે ।
સ ત્વાં નૈવાચ્યુતઃ સર્વસ્યાત્યયે સત્યપિ ત્યજેત્ ॥ ૬॥

દેવિ ત્વં લલનારત્નં દેવોઽસૌ પુરુષોત્તમઃ ।
યુવાં યુવાનૌ સતતં યુવયોર્ન વયોઽધિકઃ ॥ ૭॥

ત્વં પદ્મિની પદ્મવક્ત્રા પદ્માક્ષી પદ્મવિષ્ટરા ।
પદ્મદ્વયધરા પદ્મકોશોદ્યત્સ્તનશોભના ॥ ૮॥

પદ્મહસ્તા પદ્મપાદા પદ્મનાભમનઃપ્રિયા ।
પદ્મોદ્ભવસ્ય જનની પદ્મા ચ વરવર્ણિની ॥ ૯॥

અમ્બાં પીતામ્બરશ્રોણીં લમ્બાલકલસન્મુખીમ્ ।
બિમ્બાધરોષ્ઠીં કસ્તૂરિજમ્બાલતિલકાં ભજે ॥ ૧૦॥

રત્નોદ્દીપ્તસુમાઙ્ગલ્યસૂત્રાવૃત્તશિરોધરામ્ ।
કુણ્ડલપ્રભયોદ્દ્યણ્ડગણ્ડમણ્ડલમણ્ડિતામ્ ॥ ૧૧॥

કુચકઞ્ચુકસઞ્ચારિહારનિષ્કમનોહરામ્ ।
કાઞ્ચીકિઙ્કિણિમઞ્જીરકઙ્કણાદ્યૈરલઙ્કૃતામ્ ॥ ૧૨॥

સુવર્ણમણ્ડપે રત્નચિત્રસિંહાસનોત્તમે ।
નમામિ હરિણા સાકમિન્દિરાં કૃતમન્દિરામ્ ॥ ૧૩॥

બ્રહ્માદ્યા વિબુધશ્રેષ્ઠા બ્રહ્માણ્યાદ્યાઃ સુરાઙ્ગનાઃ ।
યાં પૂજયન્તે સેવન્તે સા માં પાતુ રમા સદા ॥ ૧૪॥

સર્વાલઙ્કારભરિતૌ સર્વજ્ઞૌ સર્વસદ્ગુણૌ ।
શર્વાદિસર્વભક્તૌઘ સર્વસર્વસ્વદાયકૌ ॥ ૧૫॥

સુમુખૌ સુન્દરતરૌ સુનાસૌ સુખચિત્તનૂ ।
સુરારાધિતપાદાબ્જૌ રમાનારાયણૌ સ્તુમઃ ॥ ૧૬॥

ચતુષ્કપર્દા યા દેવી ચતુરાસ્યાદિભિઃ સ્તુતા ।
ચતુર્વેદોદિતગુણા ચતુર્મૂર્તેર્હરેઃ પ્રિયા ॥ ૧૭॥

ધૃતપ્રતીકાં તાં નિત્યં ધૃતપૂર્ણાન્નદાયિનીમ્ ।
યથેષ્ટવિત્તદાત્રિં ચ નતોઽસ્મ્યભયદાં શ્રિયમ્ ॥ ૧૮॥

વાદિરાજેન રચિતં શ્રીશ્રીશગુણદર્પણમ્ ।
ઇમં સ્તવં પઠન્મર્ત્યઃ શ્રીમાન્સ્યાન્નાત્ર સંશયઃ ॥ ૧૯॥

॥ ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
શ્રી શ્રીશગુણદર્પણસ્તોત્રં સમ્પૂર્ણમ્ ॥

samanA refers to brahmasUtra 4.2.7

*shrI shrIshaguNadarpaNastotram*

pdf was typeset on December 13, 2020

Please send corrections to *sanskrit@cheerful.com*